॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ८५

कृतबुद्धिं निवासाय तथैव स मुनिस्तदा ।
भरतं कैकयी पुत्रमातिथ्येन न्यमन्त्रयत् ॥ १॥

अब्रवीद्भरतस्त्वेनं नन्विदं भवता कृतम् ।
पाद्यमर्घ्यं तथातिथ्यं वने यदूपपद्यते ॥ २॥

अथोवाच भरद्वाजो भरतं प्रहसन्निव ।
जाने त्वां प्रीति संयुक्तं तुष्येस्त्वं येन केन चित् ॥ ३॥

सेनायास्तु तवैतस्याः कर्तुमिच्छामि भोजनम् ।
मम प्रितिर्यथा रूपा त्वमर्हो मनुजर्षभ ॥ ४॥

किमर्थं चापि निक्षिप्य दूरे बलमिहागतः ।
कस्मान्नेहोपयातोऽसि सबलः पुरुषर्षभ ॥ ५॥

भरतः प्रत्युवाचेदं प्राञ्जलिस्तं तपोधनम् ।
ससैन्यो नोपयातोऽस्मि भगवन्भगवद्भयात् ॥ ६॥

वाजि मुख्या मनुष्याश्च मत्ताश्च वर वारणाः ।
प्रच्छाद्य महतीं भूमिं भगवन्ननुयान्ति माम् ॥ ७॥

ते वृक्षानुदकं भूमिमाश्रमेषूटजांस्तथा ।
न हिंस्युरिति तेनाहमेक एवागतस्ततः ॥ ८॥

आनीयतामितः सेनेत्याज्ञप्तः परमर्षिणा ।
तथा तु चक्रे भरतः सेनायाः समुपागमम् ॥ ९॥

अग्निशालां प्रविश्याथ पीत्वापः परिमृज्य च ।
आतिथ्यस्य क्रियाहेतोर्विश्वकर्माणमाह्वयत् ॥ १०॥

आह्वये विश्वकर्माणमहं त्वष्टारमेव च ।
आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् ॥ ११॥

प्राक्स्रोतसश्च या नद्यः प्रत्यक्स्रोतस एव च ।
पृथिव्यामन्तरिक्षे च समायान्त्वद्य सर्वशः ॥ १२॥

अन्याः स्रवन्तु मैरेयं सुरामन्याः सुनिष्ठिताम् ।
अपराश्चोदकं शीतमिक्षुकाण्डरसोपमम् ॥ १३॥

आह्वये देवगन्धर्वान्विश्वावसुहहाहुहून् ।
तथैवाप्सरसो देवीर्गन्धर्वीश्चापि सर्वशः ॥ १४॥

घृताचीमथ विश्वाचीं मिश्रकेशीमलम्बुसाम् ।
शक्रं याश्चोपतिष्ठन्ति ब्रह्माणं याश्च भामिनीः ।
सर्वास्तुम्बुरुणा सार्धमाह्वये सपरिच्छदाः ॥ १५॥

वनं कुरुषु यद्दिव्यं वासो भूषणपत्रवत् ।
दिव्यनारीफलं शश्वत्तत्कौबेरमिहैव तु ॥ १६॥

इह मे भगवान्सोमो विधत्ताम् अन्नमुत्तमम् ।
भक्ष्यं भोज्यं च चोष्यं च लेह्यं च विविधं बहु ॥ १७॥

विचित्राणि च माल्यानि पादपप्रच्युतानि च ।
सुरादीनि च पेयानि मांसानि विविधानि च ॥ १८॥

एवं समाधिना युक्तस्तेजसाप्रतिमेन च ।
शिक्षास्वरसमायुक्तं तपसा चाब्रवीन्मुनिः ॥ १९॥

मनसा ध्यायतस्तस्य प्राङ्मुखस्य कृताञ्जलेः ।
आजग्मुस्तानि सर्वाणि दैवतानि पृथक्पृथक् ॥ २०॥

मलयं दुर्दुरं चैव ततः स्वेदनुदोऽनिलः ।
उपस्पृश्य ववौ युक्तया सुप्रियात्मा सुखः शिवः ॥ २१॥

ततोऽभ्यवर्तन्त घना दिव्याः कुसुमवृष्टयः ।
देवदुन्दुभिघोषश्च दिक्षु सर्वासु शुश्रुवे ॥ २२॥

प्रववुश्चोत्तमा वाता ननृतुश्चाप्सरोगणाः ।
प्रजगुर्देवगन्धर्वा वीणा प्रमुमुचुः स्वरान् ॥ २३॥

स शब्दो द्यां च भूमिं च प्राणिनां श्रवणानि च ।
विवेशोच्चारितः श्लक्ष्णः समो लयगुणान्वितः ॥ २४॥

तस्मिन्नुपरते शब्दे दिव्ये श्रोत्रसुखे नृणाम् ।
ददर्श भारतं सैन्यं विधानं विश्वकर्मणः ॥ २५॥

बभूव हि समा भूमिः समन्तात्पञ्चयोजनम् ।
शाद्वलैर्बहुभिश्छन्ना नीलवैदूर्यसंनिभैः ॥ २६ ॥

तस्मिन्बिल्वाः कपित्थाश्च पनसा बीजपूरकाः ।
आमलक्यो बभूवुश्च चूताश्च फलभूषणाः ॥ २७ ॥

उत्तरेभ्यः कुरुभ्यश्च वनं दिव्योपभोगवत् ।
आजगाम नदी दिव्या तीरजैर्बहुभिर्वृता ॥ २८ ॥

चतुःशालानि शुभ्राणि शालाश्च गजवाजिनाम् ।
हर्म्यप्रासादसङ्घातास्तोरणानि शुभानि च ॥ २९ ॥

सितमेघनिभं चापि राजवेश्म सुतोरणम् ।
शुक्लमाल्यकृताकारं दिव्यगन्धसमुक्षितम् ॥ ३० ॥

चतुरस्रमसम्बाधं शयनासनयानवत् ।
दिव्यैः सर्वरसैर्युक्तं दिव्यभोजनवस्त्रवत् ॥ ३१ ॥

उपकल्पित सर्वान्नं धौतनिर्मलभाजनम् ।
कृतसर्वासनं श्रीमत्स्वास्तीर्णशयनोत्तमम् ॥ ३२ ॥

प्रविवेश महाबाहुरनुज्ञातो महर्षिणा ।
वेश्म तद्रत्नसम्पूर्णं भरतः कैकयीसुतः ॥ ३३ ॥

अनुजग्मुश्च तं सर्वे मन्त्रिणः सपुरोहिताः ।
बभूवुश्च मुदा युक्ता तं दृष्ट्वा वेश्म संविधिम् ॥ ३४ ॥

तत्र राजासनं दिव्यं व्यजनं छत्रमेव च ।
भरतो मन्त्रिभिः सार्धमभ्यवर्तत राजवत् ॥ ३५ ॥

आसनं पूजयामास रामायाभिप्रणम्य च ।
वालव्यजनमादाय न्यषीदत्सचिवासने ॥ ३६ ॥

आनुपूर्व्यान्निषेदुश्च सर्वे मन्त्रपुरोहिताः ।
ततः सेनापतिः पश्चात्प्रशास्ता च निषेदतुः ॥ ३७ ॥

ततस्तत्र मुहूर्तेन नद्यः पायसकर्दमाः ।
उपातिष्ठन्त भरतं भरद्वाजस्य शासनत् ॥ ३८ ॥

तासामुभयतः कूलं पाण्डुमृत्तिकलेपनाः ।
रम्याश्चावसथा दिव्या ब्रह्मणस्तु प्रसादजाः ॥ ३९ ॥

तेनैव च मुहूर्तेन दिव्याभरणभूषिताः ।
आगुर्विंशतिसाहस्रा ब्राह्मणा प्रहिताः स्त्रियः ॥ ४० ॥

सुवर्णमणिमुक्तेन प्रवालेन च शोभिताः ।
आगुर्विंशतिसाहस्राः कुबेरप्रहिताः स्त्रियः ॥ ४१ ॥

याभिर्गृहीतः पुरुषः सोन्माद इव लक्ष्यते ।
आगुर्विंशतिसाहस्रा नन्दनादप्सरोगणाः ॥ ४२ ॥

नारदस्तुम्बुरुर्गोपः पर्वतः सूर्यवर्चसः ।
एते गन्धर्वराजानो भरतस्याग्रतो जगुः ॥ ४३ ॥

अलम्बुसा मिश्रकेशी पुण्डरीकाथ वामना ।
उपानृत्यंस्तु भरतं भरद्वाजस्य शासनात् ॥ ४४ ॥

यानि माल्यानि देवेषु यानि चैत्ररथे वने ।
प्रयागे तान्यदृश्यन्त भरद्वाजस्य शासनात् ॥ ४५ ॥

बिल्वा मार्दङ्गिका आसञ्शम्या ग्राहा बिभीतकाः ।
अश्वत्था नर्तकाश्चासन्भरद्वाजस्य तेजसा ॥ ४६ ॥

ततः सरलतालाश्च तिलका नक्तमालकाः ।
प्रहृष्टास्तत्र सम्पेतुः कुब्जाभूताथ वामनाः ॥ ४७ ॥

शिंशपामलकी जम्बूर्याश्चान्याः कानने लताः ।
प्रमदा विग्रहं कृत्वा भरद्वाजाश्रमेऽवसन् ॥ ४८ ॥

सुरां सुरापाः पिबत पायसं च बुभुक्षिताः ।
मांसनि च सुमेध्यानि भक्ष्यन्तां यावदिच्छथ ॥ ४९ ॥

उत्साद्य स्नापयन्ति स्म नदीतीरेषु वल्गुषु ।
अप्येकमेकं पुरुषं प्रमदाः सप्त चाष्ट च ॥ ५० ॥

संवहन्त्यः समापेतुर्नार्यो रुचिरलोचनाः ।
परिमृज्य तथा न्यायं पाययन्ति वराङ्गनाः ॥ ५१ ॥

हयान्गजान्खरानुष्ट्रांस्तथैव सुरभेः सुतान् ।
इक्षूंश्च मधुजालांश्च भोजयन्ति स्म वाहनान् ।
इक्ष्वाकुवरयोधानां चोदयन्तो महाबलाः ॥ ५२ ॥

नाश्वबन्धोऽश्वमाजानान्न गजं कुञ्जरग्रहः ।
मत्तप्रमत्तमुदिता चमूः सा तत्र सम्बभौ ॥ ५३ ॥

तर्पिता सर्वकामैस्ते रक्तचन्दनरूषिताः ।
अप्सरोगणसंयुक्ताः सैन्या वाचमुदैरयन् ॥ ५४ ॥

नैवायोध्यां गमिष्यामो न गमिष्याम दण्डकान् ।
कुशलं भरतस्यास्तु रामस्यास्तु तथा सुखम् ॥ ५५ ॥

इति पादातयोधाश्च हस्त्यश्वारोहबन्धकाः ।

अनाथास्तं विधिं लब्ध्वा वाचमेताम् उदैरयन् ॥ ५६ ॥

सम्प्रहृष्टा विनेदुस्ते नरास्तत्र सहस्रशः ।
भरतस्यानुयातारः स्वर्गेऽयमिति चाब्रुवन् ॥ ५७ ॥

ततो भुक्तवतां तेषां तदन्नममृतोपमम् ।
दिव्यानुद्वीक्ष्य भक्ष्यांस्तानभवद्भक्षणे मतिः ॥ ५८ ॥

प्रेष्याश्चेत्यश्च वध्वश्च बलस्थाश्चापि सर्वशः ।
बभूवुस्ते भृशं तृप्ताः सर्वे चाहतवाससः ॥ ५९ ॥

कुञ्जराश्च खरोष्ट्रश्च गोऽश्वाश्च मृगपक्षिणः ।
बभूवुः सुभृतास्तत्र नान्यो ह्यन्यमकल्पयत् ॥ ६० ॥

नाशुक्लवासास्तत्रासीत्क्षुधितो मलिनोऽपि वा ।
रजसा ध्वस्तकेशो वा नरः कश्चिददृश्यत ॥ ६१ ॥

आजैश्चापि च वाराहैर्निष्ठानवरसञ्चयैः ।
फलनिर्यूहसंसिद्धैः सूपैर्गन्धरसान्वितैः ॥ ६२ ॥

पुष्पध्वजवतीः पूर्णाः शुक्लस्यान्नस्य चाभितः ।
ददृशुर्विस्मितास्तत्र नरा लौहीः सहस्रशः ॥ ६३ ॥

बभूवुर्वनपार्श्वेषु कूपाः पायसकर्दमाः ।
ताश्च कामदुघा गावो द्रुमाश्चासन्मधुस्रुतः ॥ ६४ ॥

वाप्यो मैरेय पूर्णाश्च मृष्टमांसचयैर्वृताः ।
प्रतप्त पिठरैश्चापि मार्गमायूरकौक्कुटैः ॥ ६५ ॥

पात्रीणां च सहस्राणि शातकुम्भमयानि च ।
स्थाल्यः कुम्भ्यः करम्भ्यश्च दधिपूर्णाः सुसंस्कृताः ।
यौवनस्थस्य गौरस्य कपित्थस्य सुगन्धिनः ॥ ६६ ॥

ह्रदाः पूर्णा रसालस्य दध्नः श्वेतस्य चापरे ।
बभूवुः पायसस्यान्ते शर्करायाश्च सञ्चयाः ॥ ६७ ॥

कल्कांश्चूर्णकषायांश्च स्नानानि विविधानि च ।
ददृशुर्भाजनस्थानि तीर्थेषु सरितां नराः ॥ ६८ ॥

शुक्लानंशुमतश्चापि दन्तधावनसञ्चयान् ।
शुक्लांश्चन्दनकल्कांश्च समुद्गेष्ववतिष्ठतः ॥ ६९ ॥

दर्पणान्परिमृष्टांश्च वाससां चापि सञ्चयान् ।
पादुकोपानहां चैव युग्मान्यत्र सहस्रशः ॥ ७० ॥

आञ्जनीः कङ्कतान्कूर्चांश्छत्राणि च धनूंषि च ।
मर्मत्राणानि चित्राणि शयनान्यासनानि च ॥ ७१ ॥

प्रतिपानह्रदान्पूर्णान्खरोष्ट्रगजवाजिनाम् ।
अवगाह्य सुतीर्थांश्च ह्रदान्सोत्पल पुष्करान् ॥ ७२ ॥

नीलवैदूर्यवर्णांश्च मृदून्यवससञ्चयान् ।
निर्वापार्थं पशूनां ते ददृशुस्तत्र सर्वशः ॥ ७३ ॥

व्यस्मयन्त मनुष्यास्ते स्वप्नकल्पं तदद्भुतम् ।
दृष्ट्वातिथ्यं कृतं तादृग्भरतस्य महर्षिणा ॥ ७४ ॥

इत्येवं रममाणानां देवानाम् इव नन्दने ।
भरद्वाजाश्रमे रम्ये सा रात्रिर्व्यत्यवर्तत ॥ ७५ ॥

प्रतिजग्मुश्च ता नद्यो गन्धर्वाश्च यथागतम् ।
भरद्वाजमनुज्ञाप्य ताश्च सर्वा वराङ्गनाः ॥ ७६ ॥

तथैव मत्ता मदिरोत्कटा नरास्
तथैव दिव्यागुरुचन्दनोक्षिताः ।
तथैव दिव्या विविधाः स्रगुत्तमाः
पृथक्प्रकीर्णा मनुजैः प्रमर्दिताः ॥ ७७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com